इति राजनिर्घण्टः ॥ शैत्यम् । इति शब्दरत्नावली ॥ वीरणमूलम् । इति शब्दचन्द्रिका ॥

शीतलः, पुं, अश्मनपर्णी । इत्यमरः ॥ अर्हद्विशेषः । स तु चतुर्विंशतितीर्थङ्करमध्ये दशमतीर्थङ्करः । इति हेमचन्द्रः ॥ व्रतविशेषः । स तु मेषसंक्रान्त्यां कर्त्तव्यः । चन्द्रः । इति शब्दचन्द्रिका ॥ चम्पकः । कर्पूरभेदः । शालः । इति राजनिर्घण्टः ॥

शीतलः, त्रि, (शीतोऽस्यास्तीति । शीत + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) शीतगुणविशिष्टः । तत्पर्य्यायः । सुषीमः २ शिशिरः ३ जडः ४ तुषारः ५ शीतः ६ हिमः ७ । इत्यमरः ॥

शीतलकं, क्ली, सितोत्पलम् । इति राजनिर्घण्टः ॥

शीतलकः, पुं, मरुवकः । इति राजनिर्घण्टः ॥

शीतलच्छदः, पुं, (शीतलश्छदो यस्य ।) चम्पकः । इति राजनिर्घण्टः ॥ शीतलपत्रश्च ॥

शीतलजलं, क्ली, (शीतलं जलं यस्य ।) उत्पलम् । इति राजनिर्घण्टः ॥ हिमवारि च ॥

शीतलता, स्त्री, (शीतलस्य भावः । तल् ।) शीतलत्वम् । शीतलस्य भाव इत्यर्थे तद्भावे तात्वमिति संक्षिप्तसारसूत्रेण ताप्रत्ययनिष्पन्ना ॥

शीतलत्वं, क्ली, (शीतलस्य भावः । त्व ।) जड़ता । इति राजनिर्घण्टः ॥ शीतलता च ॥

शीतलप्रदः, पुं, (शीतलं प्रददाति । प्र + दा + कः ।) चन्दनम् । इति केचित् ॥ हिमदातरि, त्रि ॥

शीतलवातकः, पुं, (शीतलो वातो यस्य । कन् ।) अश्मनपर्णी । इति शब्दरत्नावली ॥ शीतलवायुयुक्ते, त्रि ॥

शीतला, स्त्री, (शीतल + स्त्रियां टाप् ।) शीतलीवृक्षः । यथा,—

"शीतला शीतली शीतकुम्भी पाण्डरपुष्पिका ।"

इति शब्दचन्द्रिका ॥

देवीविशेषः । सा च वसन्तविस्फोटकादेरधिष्ठात्री देवता । यथा,—

स्कन्द उवाच ।

"भगवन् देवदेवेश शीतलायाः स्तवं शुभम् ।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम् ॥

ईश्वर उवाच ।

नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्ज्जनीकलसोपेतां सूर्पालङ्कृतमस्तकाम् ॥

इति स्कन्दपुराणम् ॥

अस्या विवरणं मसूरिकाशब्दे द्रष्टव्यम् ॥ कुटुम्बिनी । आरामशीतला । वालुका । इति राजनिर्घण्टः ॥

शीतलाषष्ठी, स्त्री, (शीतला षष्ठी ।) माघशुक्ला षष्ठी । यथा,—

"प्रसूत्या द्वादशे मासि पूज्यापत्यविवृद्धये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्द्दमी ज्ञेया श्रावणे लुण्ठनी तथा ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजि तथा ।
नाड्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी
पौषे मास्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"

इति स्कन्दपुराणम् ॥

शीतली, स्त्री, जलजवृक्षविशेषः । शिउलीझोप् इति भाषा । तत्पर्य्यायः । शीतकुम्भी २ शुक्लपुष्पा ३ जलोद्भवा ४ कालानुसारिवा ५ । इति रत्नमाला ॥

शीतवल्कः, पुं, (शीतलो वल्को यस्य ।) उडुम्बरः । इति राजनिर्घण्टः ॥ शीतलवल्कले, त्रि ॥

शीतवीर्य्यकः, पुं, (शीतं वीर्य्यं यस्य । कन् ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ शीतलवीर्य्ययुक्ते, त्रि ॥

शीतशिवं, क्ली, (शीते शीतकाले शिवं मङ्गलप्रदम् ।) सैन्धवलवणम् । शैलेयनामगन्धद्रव्यम् । इत्यमरः ॥

शीतशिवः, पुं, (शीते शीतकाले शिवः शुभप्रदः ।) मधुरिका । इत्यमरः ॥ शक्तुफलावृक्षः । इति मेदिनी ॥

शीतशिवा, स्त्री, (शीते शिवा मङ्गलप्रदा ।) मिश्रेया । इति राजनिर्घण्टः ॥ शमीवृक्षः । इति रत्नमाला ॥

शीतशूकः, पुं, शीते शूको यस्य ।) यवः । इति केचित् ॥ शीतलशूकयुक्ते, त्रि ॥

शीतसहः, पुं, (शीतं सहते इति । सह + अच् ।) पीलुवृक्षः । इति जटाधरः ॥ शीतसहनीये, त्रि ॥

शीतसहा, स्त्री, (शीतसह + टाप् ।) नीलसिन्धुवारः । वासन्ती । इति राजनिर्घण्टः ॥

शीता, स्त्री, रामपत्नी । इति शब्दरत्नावली ॥ लाङ्गलपद्धतिः । इत्यमरटीकायां भरतः ॥ यथा,—

"शीता नभःसरिदिति लाङ्गलपद्धतौ च
शीता दशाननरिपोः सहधर्म्मिणी च ।
शीतं स्मृतं हिमगुणे च तदन्विते च
शीतोऽलसे च बहुवारतरौ च दृष्टः ॥"

इति तालव्यादौ धरणिः ॥

अतिबला । कुटुम्बिनी । दूर्व्वा । शिल्पिकातृणम् । इति राजनिर्घण्टः ॥

शीतांशुः, पुं, (शीताः अंशवो यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रः । यथा,—

"शीतांशुर्मिष्टमन्नं जनयति सततं जन्मराशौ नराणाम् ।"

इति ज्योतिस्तत्त्वम् ॥

शीतांशुतैलं, क्ली, (शीतांशोः कर्पूरस्य तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

शीताङ्गी, स्त्री, (शीतं अङ्गमस्याः । ङीष् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥ शीतलाङ्गे, त्रि ॥ (यथा, सुश्रुते । २ । ८ ।

"प्रविध्यति शिरो यातु शीताङ्गी निरपत्रपा ।
नीलोद्धतशिरा हन्ति सा गर्भं वा चतां तथा ॥")

शीतादः, पुं, (शीतमादत्ते इति । आ + दा + कः ।) दन्तरोगविशेषः । तस्य निदानं दन्तशब्दे द्रष्टव्यम् । तदौषधं यथा,—

"शीतादे हृतरक्ते तु तोयनागरसर्षपान् ।
निष्क्वाथ्य त्रिफलाञ्चापि कुर्य्याद्गण्डूषधारणम् ॥
कासीसलोध्रकृष्णा मनःशिला सप्रियङ्गुतेजोह्वा
एतच्चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥"

तेजोह्वा तेजवला ।

"तैलं घृतं वा वातघ्नं शीतादे संप्रशस्यते ।"

इति भावप्रकाशः ॥

शीताद्रिः, पुं, (शीतजनकोऽद्रिः । शीतप्रधानोऽद्रिरिति वा ।) हिमालयपर्व्वतः । इति केचित् ॥

शीताबला, स्त्री, महासमङ्गा । इति राजनिर्घण्टः ॥

शीतार्त्तः, त्रि, (शीतेन ऋतः पीड़ितः ।) शीतेन पीड़ितः । तत्पर्य्यायः । शीतालुः २ । इति जटाधरः ॥ (यथा, शिवरात्रिव्रतकथायाम् ।

"शीतार्त्तश्च क्षुधार्त्तश्च कम्पान्वितकलेवरः ।
अजागार तदा रात्रौ प्लुतो नीहारवारिणा ॥")

शीतालुः, त्रि, (शीतं न सहते इति । शीत + "शीतोष्णतृप्रेभ्यस्तन्न सहते ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आलुच् ।) शीतार्त्तः । इति जटाधरः ॥

शीताश्मा, [न्] पुं, (शीतः शीतलोऽश्मा ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ शीतलप्रस्तरश्च ॥

शीतीभावः, पुं, (शीत + भू + घञ । अभूततद्भावे च्विः ।) मोक्षः । इति त्रिकाण्डशेषः ॥ शीतलत्वञ्च ॥

शीतोत्तमं, क्ली, (शीतेषु वस्तुषु मध्ये उत्तमम् ।) जलम् । इति शब्दचन्द्रिका ॥

शीत्यं, त्रि, सीत्यम् । कृष्टम् । इत्यमरटीकायां रमानाथः ॥ शीतयोग्यञ्च ॥

शीत्कारः, पुं, (शीदिति शब्दस्य कारः करणम् ।) वरस्त्रीणां रतिकालध्वनिः । यथा,—

"शीत्कारो रतनारीणः सुरते वरयोषिताम् ।"

इति जटाधरः ॥

(शीत्कृतिमात्रे । यथा, कथासरित्सागरे । १ । २ ।

"सन्ध्यानृत्योत्सवे ताराः करेणोद्धूय विघ्नजित् ।
शीत्कारशीकरैरन्याः कल्पयन्निव पातु वः ॥")

शीत्कृतं, क्ली, (शीदिति शब्दस्य कृतं करणम् ।) शीत्कारः । इति धरणिः ॥

शीधुः, पुं, क्ली, (शेतेऽनेनेति । शी + "शीङो धुक्लग्वलञ् वालनः ।" उणा० ४ । ३८ । इति धुक् ।) पक्वेक्षुरसकृतमद्यम् । इत्यमरभरतौ ॥

शीधुपः, त्रि, (शीधुं पातीति । पा + कः ।) शीधुपानकर्त्ता । इति शाब्दिकाः ॥

शीधुगन्धः, पुं, (शीधोर्मद्यविशेषस्य गन्धो यत्र ।) वकुलवृक्षः । इति त्रिकाण्डशेषः ॥ मद्यगन्धश्च ॥

शीनं, त्रि, (श्यैङ गतौ + क्तः । "द्रवमूर्त्तिस्पर्शयोः श्यः ।" ६ । १ । २४ । इति सम्प्रसारणम् । "श्योऽस्पर्शे ।" ८ । २ । ४७ । इति नः ।) घनीभूतघृतादि । इति मुग्धबोधव्याकरणम् ॥